# आयुष्य सूक्तं

## āyuṣya sūktaṁ

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी । ईशानो देवः स न आयु र्ददातु तस्मै जुहोमि हविषा घृतेन । स्वाहा ।

yo brahmā brahmaṇa ujjahāra prāṇaiḥ śiraḥ kṛttivāsāḥ pinākī । īśāno devaḥ sa na āyu rdadātu tasmai juhomi haviṣā ghṛtena । svāhā ।

विभ्राजमानः सरिरस्य मध्याद्रोचमानो घर्मरुचि र्य आगात् । स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः । स्वाहा ।

vibhrājamānaḥ sarirasya madhyādrocamāno gharmaruci rya āgāt । sa mṛtyupāśānapanudya ghorānihāyuṣeṇo ghṛtamattu devaḥ । svāhā ।

ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयंतं । सुवर्णरम्भग्रहम र्कमर्च्यं तमायुषे वर्धयामो घृतेन । स्वाहा ।

brahmajyotirbrahmapatnīṣu garbhaṁ yamādadhāt pururūpaṁ jayaṁtaṁ । suvarṇarambhagrahama rkamarcyaṁ tamāyuṣe vardhayāmo ghṛtena । svāhā ।

श्रियं लक्ष्मीमौबलामंबिकां गां षष्ठीं च यामिंद्रसेनेत्युदाहुः । तां विद्यां ब्रह्मयोनिꣳ सरूपामिहायुषे तर्पयामो घृतेन । स्वाहा ।

śriyaṁ lakṣmīmaubalāmambikāṁ gāṁ ṣaṣṭhīṁ ca yāmindrasenetyudāhuḥ । tāṁ vidyāṁ brahmayoniꣳ sarūpāmihāyuṣe tarpayāmo ghṛtena । svāhā ।

दाक्षायण्यः  सर्वयोन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः । ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषंताम् । स्वाहा ।

dākṣāyaṇyaḥ  sarvayonyaḥ sa yonyaḥ sahasraśo viśvarūpā virūpāḥ । sasūnavaḥ sapatayaḥ sayūthyā āyuṣeṇo ghṛtamidaṁ juṣaṁtām । svāhā ।

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नंतु वीरान्। तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाᳬ रीरिषो मोत वीरान्। स्वाहा।

divyā gaṇā bahurūpāḥ purāṇā āyuśchido naḥ pramathnantu vīrān। tebhyo juhomi bahudhā ghṛtena mā naḥ prajām̐ rīriṣo mota vīrān। svāhā।

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः। यम्प्येति भुवनᳬ सांपराये स नो हविर्घृतमिहायुषेत्तु देवः। स्वाहा।

ekaḥ purastāt ya idaṁ babhūva yato babhūva bhuvanasya gopāḥ। yampyeti bhuvanam̐ sāṁparāye sa no havirghṛtamihāyuṣettu devaḥ। svāhā।

वसून् रुद्रानादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गन्धर्वाᳬश्च पितॄᳬश्च विश्वान्। भृगून् सर्पाᳬश्चांगिरसोऽथ सर्वान् घृतᳬ हुत्वा स्वायुष्या महयाम शश्वत्। स्वाहा।

vasūn rudrānādityān maruto'tha sādhyān ṛbhūn yakṣān gandharvām̐śca pitṝm̐śca viśvān। bhṛgūn sarpām̐ścāṅgiraso'tha sarvān ghṛtam̐ hutvā svāyuṣyā mahayāma śaśvat। svāhā।

विष्णो त्वं नोअंतमश्शर्मयच्च सहंत्य। प्रतेधारा मधुश्चुत उथ्सं दुह्रते अक्षितं। स्वाहा।

viṣṇo tvaṁ noantamaśśarmayacca sahantya। pratedhārā madhuścuta uthsaṁ duhrate akṣitaṁ। svāhā।